**113.** 'आसीत्' कस्य लकारस्य रूपम् अस्ति ?

(1) विधिलिङ्

(2) लट्

(3) लङ्

(4) लुङ्

**114.** 'गच्छ' कस्य लकारस्य, पुरुषस्य वचनस्य च रूपम् अस्ति ?

(1) गच्छ् + लोट् उत्तमपुरुषः + एकवचनम्

(2) गम् + लोट् मध्यमपुरुषः + एकवचनम्

(3) गच्छ् + लोट् मध्यमपुरुषः + एकवचनम्

(4) गम् + विधिलिङ् मध्यमपुरुषः + द्विवचन्

***निर्देशः :*** *अधोलिखितान् श्लोकान् पठित्वा षट् प्रश्नानां (प्रश्नसङ्ख्या 115 – 120) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चिनुत ।*

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद धर्मं ततः सुखम् ॥ 1 ॥

विश्वासो हि ययोर्मध्ये तयोर्मध्येऽस्ति सौहृदम् ।
यस्मिन्नैवास्ति विश्वासः तस्मिन् मैत्री क्व सम्भवा ॥ 2 ॥

अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत् ।
जयेत कदर्यं दानेन जयेत् सत्येन चानृतम् ॥ 3 ॥

अनाहूतः प्रविशति अपृष्टो बहुभाषते ।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥ 4 ॥

षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता ॥ 5 ॥

**115.** विनयात् किं प्राप्नोति ?

(1) विश्वासम्

(2) धनम्

(3) पात्रताम्

(4) सत्यम्

**116.** मैत्री कुत्र न भवितुम् अर्हति ?

(1) यत्र विश्वासः न वर्तते ।

(2) यत्र असमानता वर्तते ।

(3) यत्र क्रोधः भवति ।

(4) यत्र धनं नास्ति ।

**117.** 'कदर्यम्' इत्यस्य शब्दस्य कोऽर्थः?

(1) दीनता

(2) निर्दयम्

(3) दुर्बलता

(4) धनव्यये संकोचः

**118.** 'यस्मिन्नैवास्ति' अत्र निम्नलिखितेषु कः सन्धिविच्छेदः समीचीनः ?

(1) यस्मिन् + ना + इव + आस्ति

(2) यस्मिन् + न + एव + अस्ति

(3) यस्मिन् + न + इव + अस्ति

(4) यस्मिन् + न + ऐव + अस्ति

**119.** 'इच्छता' पदस्य निर्वचनम् किम् भवति ?

(1) इष् + शतृ + आ (तृतीया-एकवचनम्)

(2) इच्छ् + क्त + स्त्रीलिङ् + प्रथमा-एकवचनम्

(3) इच्छ् + अच् + ता + तृतीया-एकवचनम्

(4) इष् + अत् + आ

**120.** निम्नलिखितेषु को धातुः भ्वादिगणस्य विद्यते ?

(1) ददाति

(2) जयेत्

(3) प्रविशति

(4) याति

**145.** एका माता द्वितीयकक्षायाः अध्यापकं कथयति यत् तया निरीक्षितं यत् तस्याः बालकः यदा कदा तादृशं भाषाप्रयोगं करोति यत्तया कस्मादपि प्रौढात् भगिनी भ्रातुः वा कदापि न श्रुतः । एतत्कथं सम्भवति ? अस्य प्रश्नस्य किमुत्तरं समीचीनम् अस्ति ।

(1) रचनात्मक-उपागमानुसार, बालकाः नवीनाः भाषाः अन्वेष्टुं सक्षमा भवन्ति ।

(2) बालकः केवलं स्वप्रौढजनाम् अनुकृत्य शिक्षति ।

(3) मानवमस्तिष्कं सहजातरूपेण भाषां शिक्षितु योग्यम् अस्ति ।

(4) बालकः तदा भाषां शिक्षति यदा वयं बालकस्य भाषां शक्तिकृतां कुर्मः ।

**146.** पूर्वतरं साक्षरतां प्रोत्साहयितुं प्रौढजनः, एक बालकश्च उभौ सह एव एकं पुस्तकं पश्यतः । प्रौढः जनः प्रश्नान् पृच्छति वार्तालापम् प्रारब्धुम्, तदनु उभयोः भूमिका परिवर्तते । ततः बालकः प्रौढं प्रश्नान् पृच्छति । इयं पद्धतिः किं कथ्यते ?

(1) कथाश्रावणम्

(2) आदर्शपठनम् (Model reading)

(3) सहपठनम्

(4) वार्तालापीय-पठनम्

**147.** अध्यापकः भाषा-छात्राणां श्रवणकौशलं केन उपायेन वर्धयितुं समर्थः ?

(1) यत्किञ्चिद् अनायासं श्रूयते तद् अपि सावधानतया श्रोतुं प्रेरणेन ।

(2) छात्रैः सह कक्षायां, कक्षायाः बहिश्चापि निरन्तरं सम्भाषणेन ।

(3) अन्यैः भाषाकौशलैः सह संयोगेन विना केवलं श्रवणकौशले केन्द्रीभूतेन ।

(4) छात्राणां कृते विभिन्नप्रकारान् जनान् च श्रोतुं अवसरप्रदानेन तथा च श्रवणक्रियासु नियोजनेन ।

**148.** *कथनम् (A) :*

प्राथमिके स्तरे भाषायाः शुद्धता सर्वाधिका महत्त्वपूर्ण अस्ति ।

*कारणम् (R) :*

व्याकरणं प्राथमिक पाठ्यक्रमस्य अविभाज्यम् अङ्गमस्ति ।

निम्नलिखित संकेतेभ्यः शुद्धम् उत्तरं चिनुत ।

(1) (A) असत्यम् अस्ति, परं (R) सत्यम् अस्ति ।

(2) उभे (A) च (R) च सत्ये स्तः तथा च (R), (A) इत्यस्य समीचीनं व्याख्यानमस्ति ।

(3) (A) च (R) उभे सत्ये स्तः, परं (R), (A) इत्यस्य समीचीनं व्याख्यानं ***नास्ति*** ।

(4) (A) सत्यम् अस्ति, परं (R) असत्यम् अस्ति ।

**149.** भाषायाः प्रकृतेः विषये, भाषाशिक्षणस्य प्रकृतेः विषये, बालशिक्षा व्यवस्थायां उभयोश्च प्रायोगिकताविषये ये सिद्धान्ताः विश्वासाश्च सन्ति, ते किं कथ्यन्ते ?

(1) क्रियाविधिः (Technique)

(2) पाठ्यक्रमः (Syllabus)

(3) विषयवस्तु (Content)

(4) उपागमः (Approach)

**150.** रचनात्मक-मूल्याङ्कनम् (Formative Evaluation) अस्ति –

(1) अपरिवर्तनीयम् ।

(2) अध्ययन-अध्यापन-प्रक्रियायां किं भवति ।

(3) निरन्तरं विकासेन प्रोन्नत्या च सम्बद्धता ।

(4) पूर्वनिर्धारिते अथवा विशेष अवस्थायां क्रियान्वयनम् ।

